**केन्द्रीय विद्यालय संगठनम्  मुम्बई संभागः**

**संस्कृतम् (संप्रेषणात्मकम् , कोड संख्या 119)**

**कक्षा - दशमी (CLASS- X)**

**द्वितीय-पूर्वबोर्डपरीक्षा 2025 - 2026**

**पूर्णांकाः - अशीतिः (80)** **अवधिः होरात्रयम्**

---

1 .कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति

2. निर्देशाः- अस्मिन् प्रश्नपत्रे चत्वारः भागाः सन्ति ।

| | | |
|---|---|---|
| 'क' भागः | - अपठितांश-अवबोधनम् - | 10 अंकाः |
| 'ख' भागः | - रचनात्मक-कार्यम् - | 15 अंकाः |
| 'ग' भागः | - अनुप्रयुक्त- व्याकरणम् - | 25 अंकाः |
| 'घ' भागः | - पठित -अवबोधनम् - | 30 अंकाः |

3.प्रश्नानाम् उत्तराणि क्रमेण लेखनीयानि ।

4.प्रश्नपत्रानुसारं प्रश्नसंख्या अवश्यमेव लेखनीया |

5. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि ।

---

**'क' भागः - अपठितावबोधनम् - (10 अङ्काः)**

प्रश्नः-1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत ---

शुद्धं पर्यावरणम् जीवनाय परमम् आवश्यकम्। परम् अद्यत्वे सर्वत्र पर्यावरणं प्रदूषितम् वर्तते । जनाःस्वार्थसाधनाय पर्यावरणस्य विरूद्धम् आचरन्ति। ते वृक्षान् छिन्दन्ति,नद्याः सरोवरस्य च जले अवकरान् प्रक्षिपन्ति।विशिष्टपर्वाणि ते जलेषु निर्माल्यानि पुष्पाणि भस्मादिकं च पातयन्ति| औद्योगिकविकासः अपि पर्यावरणं प्रदूषयति । उद्योगशालाभ्यः निःसृत धूमः,निर्गतं दूषितं जलं,रासायनिक वस्तूनि च प्राकृतिकं वातावरणं सर्वथा प्रदूषयन्ति । सत्तालोलुपः नेतृवर्गःअपि जागरूकः न दृश्यते ।एतेन अस्माकं स्वास्थ्यं चिन्तनीयं जातम् । अतः वयं सर्वे मिलित्वा शुद्धपर्यावरणस्य रक्षार्थं सततं प्रयत्नशीलाः भवेम राष्ट्रं च रक्षेम।

(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) 1x2=2

(i)अद्यत्वे सर्वत्र किं प्रदूषितं वर्तते ?

(ii)जनाः कान् छिन्दन्ति ?

(iii)वयं कस्य रक्षार्थं सततं प्रयत्नशीलाः भवेम?

(आ) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) 2x2=4

(i)जनाः अवकरान् कुत्र प्रक्षिपन्ति?

(ii)कानि प्राकृतिकं वातावरणं सर्वथा प्रदूषयन्ति ?

(iii)जनाः स्वार्थसाधनाय किं कुर्वन्ति ?

(इ) अस्य अनुच्छेदस्य कृते एकं शीर्षकं लिखत | 1x1=1

(ई) यथानिर्देशम् उत्तरत - (केवलं प्रश्नत्रयम्) 1x3=3

(i)'सावधानः' इत्यर्थे किं पदमत्र प्रयुक्तम्?

(ii)'प्रदूषितम्' इति पदस्य किं विलोमपदम् अत्र प्रयुक्तम्?

(1)परमम् (ख) पर्यावरणम् (ग) विरूद्धम् (घ) शुद्धम्

(iii) ते वृक्षान् छिन्दन्ति' इति वाक्ये कर्तृपद किम् ?

(क) जना: (ख) छिन्दन्ति (ग) ते (घ) वृक्षान्

(iv) अस्माकं स्वास्थ्यं चिन्तनीयं जातम्' वाक्ये क्रियापदं किम् ?

(क) स्वास्थ्यम् (ख) चिन्तनीयम् (ग) जातम् (घ) अस्माकं

**'ख' भागः रचनात्मकं कार्यम् (15 अङ्काः )**

प्र. 2. भवती मुम्बईवासिनी 'स्निग्धा' अस्ति | स्वसखीं कृतिकां प्रति पर्वतीयस्थलस्य वर्णनं कुर्वन् लिखितं पत्रं पूरयित्वा पुनः लिखत (10 x ½ =5)

(i) --------- तिथिः 24 - 11- 2024

प्रियसखि (ii) ------------

सस्नेहं नमस्कारः

अत्र कुशलं तत्रास्तु विजयादशम्याः अवकाशेऽहं स्वाध्यापकैःसहपाठिभिः सह (iii)------ 'रानीखेत' इति पर्वतीयस्थलं गतवती | 'नैनीताल' इति पर्वतीयस्थलम् प्रदेशतः किञ्चित् दूरं स्थितं इदं स्थानं प्रकृतेः रम्या (iv) ------------------ वर्तते | अस्य स्थानस्य (v) ------------------सौन्दर्यं वस्तुतः अद्भुतं वर्तते | विशालैः देवदारवृक्षैः सुसज्जिता इयं देवभूमिः (vi) ------------------ अस्ति | अत्रतः सुदूरं हिमाच्छादिताः पर्वताः अपि द्रष्टुं शक्यन्ते, ये रजतेन आच्छादिताः इव प्रतीयन्ते | एकस्मिन् पर्वते तु हिमेन निर्मिता 'त्रिशूलस्य' (vii) ------ आकृतिः अपि परिलक्ष्यते | सखि, वस्तुतः मित्रैः सह पर्वतभ्रमणं (viii) ------- वर्तते , पुनः पर्वतारोहणास्य तु का कथा | अहं त्वया सह अपि एकवारं तत्र (ix) -----

इच्छामि | आशासे आवां अग्रिमे अवकाशे शीघ्रं गमिष्यावः | अधुना विरंयते मया | गृहे सर्वेभ्यः

(x) --------

भवत्याः सखी

अभिन्न हृदया

स्निग्धा

मञ्जूषा-

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| गन्तुम्, | कृतिके, | एव, | लीलास्थाली, | मनमोहिनी, | मुम्बईतः, | नमोनमः, | नैसर्गिकम्, |
| अत्यानन्दकरं, | शैक्षिकभ्रमणाय | | | | | | |

3.अधःप्रदत्तं चित्रं दृष्ट्वा मंजूषाप्रदत्तशब्द सहायतया पंच वाक्यानि संस्कृतेन लिखत   5 ×1 = 5



मञ्जूषा-

| |
|---|
| उद्यानम् , वृक्षाः , विशालाः ,'डायनोसरः' इति जीवस्य मूर्तिः ,अधः ,बालकौ, सुंदरं ,चित्रम्,स्तः |

अथवा

मंजूषाप्रदत्तशब्दसहायतया निम्नलिखितंविषयम् अधिकृत्य पंचवाक्यैः संस्कृतेन एकम् अनुच्छेदं लिखत-   ( 5 ×1 =5 )

**कविः कालिदासः**

मञ्जूषा -

| |
|---|
| संस्कृतस्य , श्रेष्ठः ,कविकुलगुरुः , उपमालंकारस्य ,सिद्धहस्तः , प्रयोगे ,सप्त ,रचनाः ,नाटकम् |

प्र.4.मञ्जूषाप्रदत्तपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत - 5 x 1 = 5

राधा  - मोहिनी कथं चिन्तिता इव प्रतीयसे ?

मोहिनी - 1. ------------------------ तस्य कृते विश्वविद्यालयस्य आवश्यकता अस्ति |

राधा - किमर्थं ! अस्माकं ग्रामे एव सर्वोदय विद्यालयः वर्तते | 2. ----------------------

मोहिनी - एतत्  कथम् सम्भवं? 3.------------------------ |

राधा - विशेषविद्यालयः ? न न, भगिनि ! सर्वकारस्य योजना अस्ति सर्वे विद्यार्थिनः सहैव अध्ययनं कुर्वन्तु |

मोहिनी - धन्यवादाः भगिनि ! महतीं चिन्ताम् अपसारितवती भवती |

राधा एवं नास्ति | 4.-------------------सर्वे विद्यार्थिनः सर्वेषाम् आवश्यकताम् अवबुध्य परस्परं साहाय्यं कुर्वन्तु |

मोहिनी - किमेतत् सत्यम् ?5.---------------------------?(विद्यालयस्य ------------ चलति )

राधा - अथ किम् ?

मोहिनी - अहं राकेशस्य शिक्षार्थं चिन्तिता अस्मि |

मञ्जूषा -

| |
|---|
| समावेशीशिक्षायाः उद्देश्यमस्ति, परम् मम पुत्रः अन्यथासमर्थः अस्ति ,एतादृशेभ्यः छात्रेभ्यः विशेषावधानस्य आवश्यकता भवति, तत्रैव प्रवेशं कारयतु , किं राकेशः अपि सामान्यबालकैः सह पठितुं शक्नोति ? |

**अथवा**

मञ्जूषायाः सहायतया अधोलिखितां कथां पूरयित्वा पुनः लिखत - 10 x ½ = 5

एकस्मिन् वने एकः सिंहः राज्यं करोति स्म्। सिंहः (1) ------------ अतीव मृदुलः, हास्यप्रियः, दयालुश्च आसीत्। सः सर्वदा प्रजानां (2) -------------------- कर्तुं रुचिमान् भवति।प्रजाजनानां सर्वप्रकारेण कल्याणं भवेदिति धिया सिंहेन स्वराज्ये त्रयः (3)---------------- नियुक्ताः।ते त्रयः मन्त्रिणः आसन्- मृगः, वानरः (4) -------------------।एते त्रयः विविधबलैः विभूषिता आसन्। मृगस्य तु मनोबलम् अतुल्यम् आसीत्, (5) -------------- च शारीरिकं बलम् अनुपमम् आसीत्।एवमेव शशकस्य (6)---------- बुद्धिबलं सर्वान् अतिशेते। एवंप्रकारेण एते त्रयः विविधबलमण्डिताः मन्त्रिणः राजकर्मणि सहयोगं प्रददति। राजाऽपि एतेषां त्रयाणां (7)---------------- विना न किमपि कार्यं कुरुते।एते मन्त्रिणः प्रजाजनानां हितसाधनाय (8)-------------- प्रयत्नं कुर्वन्ति। अतः एव सर्वे प्रजाजनाः एतान् मन्त्रिपरिषद्सदस्यान् आद्रियन्ते। किन्तु, तस्मिन्नेव वने शृगालः, लोमशिका च मन्त्रिणां रिपुतुल्यौ ईर्ष्यालू निवसतः। एतौ द्वावेव (9)------------ प्राप्तुमिच्छतः।किन्तु, मन्त्रिणां राजभक्तिकारणात् कदापि साफल्यं प्राप्तुं समर्थौ न (10) -----------------।

मञ्जूषा -

| |
|---|
| सहमतिं ,हितकार्याणि ,अभवताम् ,मन्त्रिणः ,वानरस्य ,प्रतिदिनमेव ,विलक्षणं ,सभावेन ,रिपु, शशकश्च |

## 'ग' भागः अनुप्रयुक्त व्याकरणम् (25 अङ्काः )

प्र 5. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत- 4 x 1 - 4

(i) तस्माद् रक्षेत् सदाचारं **प्राणेभ्योऽपि** विशेषतः ।

(ii) आज्ञा गुरूणां **हि+अविचारणीया** ।

(iii) धैर्य लयसमर्थ च **षडेते** पाठका गुणाः।

(iv) **कार्यक्रमः+तु** सुनिश्चितः |

**अथवा**

अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत-

(i) जीवाः **सर्वेऽत्र** मोदन्तां भावयन्तः परस्परम्।

(ii) नैतदस्त्र मनुष्येषु तैः प्रयुक्तम् **कथं+चन** ।

(iii) अथ **अर्जुन उवाच।**

(iv) लोके **चक्षुः + दानं** दुष्करमेव ।

प्र 6.अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत - (केवलं प्रश्नचतुष्टयम्) 4 x 1 = 4

(i) वानराणां **यूथपः** सर्वान्वानरान्अवदत्।

(क) यूथस्य पतिः (ख) यूथं पिबति इति (ग) यूथं पाति इति (घ) यूथस्य पः

(ii) सर्वेषामपि महत्त्वं विद्यते **समयम् अनतिक्रम्य।**

(क) समयम् यथा (ख) यथासमयम् (ग) समयानुसारम् (घ) यथासमयः

(iii) **राजादेशं** श्रुत्वा सर्वे भयत्रस्ताः ।

(क) राज्ञः आदेशं (ख) राज्ञा आदेशः (ग )राज्ञे आदेशः (घ ) राजा आदेशम

(iv) **सकरुणम्** उच्चैः अक्रन्दत्।

(क ) सह करुणम् (ख) करुणा सह (ग) सा करुणा (घ) करुणया सह

(v) अस्य सर्वं **क्रियाकलापं** पश्यामि ।

(क) क्रिया कलापः (ख) क्रियाणां कलापः (ग) क्रियस्य कलापः (घ) क्रियां कलापः

प्र 7. अधोलिखितवाक्येषु रेखाङ्क्तिपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत - (केवलं प्रश्नचतुष्टयम्) 4 x 1 = 4

(i) जगत्पतेः एषा सृष्टिः **रम् अनीयर्**।

(क) रमणीयः (ख) रमणीयम् (ग) रमणीया (घ) रमनीया

(ii) राज्ञः **दानशीलताम्** आकर्ण्य देशान्तरेभ्योऽपि जनाः तं देशम् आयान्ति स्म।

(क) दानशीलता + तल् (ख) दानशील + टाप् (ग) दानशील + मतुप् (घ) दानशील + तल्

(iii) अस्मिन् लोके विद्वांसः एव **चक्षुष् + मतुप्** प्रकीर्तिताः

(क) चक्षुष्मान् (ख) चक्षुष्मतः (ग) चक्षुष्मन्तः ( घ) चक्षुष्वन्तः

(iv)) तत्र अनेकानि **दर्शनीयानि** स्थलानि सन्ति |

(क) दृश् + तव्यत् (ख) दृश् + अनीयर् (ग) दृश् + मातुप् (घ) दृश् + दृश् + ठक्

(V) अद्य मम **वर्ष + ठक्** परीक्षा अस्ति |

(क) वार्षिकः ख) वार्षिकम् ग) वार्षिकी घ) वार्षिका

प्र 8.(अ) वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत -3 x1=3

आदित्यः - वैभव! इदानीं त्वया किं क्रियते ?

वैभवः - आदित्य ! अधुना तु मया (i)----------------- क्रियते। का वार्ता ?

आदित्यः- नास्ति विशेषः। (ii) -------------- क्रीडितुं बहिः गम्यते, त्वमपि आगच्छ।

वैभवः - न। श्वः मम परीक्षा भविष्यति अतः अद्य (iii) --------------- सम्पूर्णदिने पठामि।

मञ्जूषा -

| | | |
|---|---|---|
| अस्माभिः, | अहम् | अध्ययनं, |

**अथवा**

(आ.) वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा वाक्यानि पुनः लिखत -

(i) ------------(शिशुः )मात्रा सह गम्यते।

(ii) बालिकया-----------------(श्लोक) पठ्यन्ते।

(iii) अर्जुनेन अभ्यासाः ------------- (कृ) ।

प्र.9 कालबोधकशब्दैः अधोलिखित दिनचर्यां पूरयत- 3 x 1 = 3

(i) माता प्रातः ---------- (7:15) वादने पूजां करोति।

(ii) तदनन्तरं सर्वाणि कार्याणि समाप्य --------- (8:45) वादने कार्यालयं गच्छति ।

(iii) सायं ----------------- (4:30) वादने गृहं प्रत्यागच्छति।

प्र.10. मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितताक्येषु रिक्तस्थानानि पूरयत - 4 x 1 = 4

(i) अहं तस्य निग्रहं वायोः -------------------- दुष्करं मन्ये |

(ii) यूयं सर्वे ------------------------ मम प्रियाः । (i)

(iii) एषः कलहः ------------------ भवतां विनाशकारणं भविष्यति।

(vi) अहं ------------- तव सन्ततिं न पालयामि तर्हि कुत्र स्युः पिकाः ?

मञ्जूषा -

| | | | |
|---|---|---|---|
| यदि, | इव, | एव, | नूनं |

प्र.11.अधोलिखितवाक्येषु रेखाङ्कित-अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत - 3x1=3

(i)अयं शोकः अग्निः इव मां **<u>दहन्ति</u>** |

(क)दहसि (ख)दहतः (ग)दहथ (घ)दहति

(ii) बौद्धभिक्षूणां **<u>निवासयोग्यः</u>** स्थली इयम् ।

(क) निवासयोग्यम् (ख) निवासयोग्या (ग) निवासयोग्य: (घ) निवासयोग्याः

(iii) **<u>त्वम्</u>** एव अत्र वृष्टेः अभिनन्दनं करोमि ।

(क) सः (ख) यूयम् (ग) वयम् (घ) अहम्

**'घ' भागः पठितावबोधनम् (30 अङ्काः )**

प्र.12. अधोलिखितं अनुच्छेदम् पठित्वा प्रदत्त प्रश्नानां उत्तराणि लिखत-

अथ एकदा भगवान् बोधित्सत्त्वः बहुजन्मार्जितपुण्यफलैः शिवीनां राजा अभवत्। स बाल्यात् एव वृद्धोपसेवी, विनयशीलः, शास्त्रपारङ्गतः च आसीत्। जनकल्याणकर्मसु रतः असौ पुत्रवत् प्रजाः पालयति स्म। कारुण्य-औदार्यादिसद्गुणोपेतः स नगरस्य समन्ततः धन-धान्यसमृद्धाः दानशालाः अकारयत्। तत्र अर्थिनां समूहः अन्न-पान वसन-रजत-सुवर्णादिकानि अभीष्टानि वस्तूनि प्राप्य सन्तुष्टः अभवत्। राज्ञः दानशीलताम् आकर्ण्य देशान्तरेभ्योऽपि जनाः तं देशम् आयान्ति स्म। अथ कदाचित् दानशालासु विचरन् स राजा बहुधनलाभेन सन्तुष्टानाम् अर्थिनां विरलसंख्यां विलोक्य अचिन्तयत् 'मम अर्थिनः तु

धनलाभमात्रेण सन्तोषं भजन्ते। नूनं ते दानवीराः सौभाग्यशालिनः यान् याचकाः शरीरस्य अङ्गानि अपि याचन्ते।'

अ. एकपदेन उत्तरत (केवलं प्रश्नद्वयम्) ½ x 2 = 1

(i) भगवान् बोधिसत्त्वः कथं शिवीनां राजा अभवत्?

(ii) के सौभाग्यशालिनः यान याचकाः शरीरस्य अङ्गानि याचन्ते ?

(iii) राज्ञः दानशीलताम् आकर्ण्य देशान्तरेभ्योऽपि के तं देशम् आयान्ति स्म?

आ. पूर्णवाक्वेन उत्तरत- (केवलं प्रश्नद्वयम्) 2 x 1 = 2

(i) बोधिसत्त्वः बाल्यात् एव कीदृशः आसीत्?

(ii) शिवेः राज्ये याचकाः किं लब्ध्वा सन्तुष्टाः अभवन् ?

(iii) अर्थिनां विरलसंख्या विलोक्य राजा किम् अचिन्तयत्

इ. निर्देशानुसारम् उत्तरत - (केवलं प्रश्नद्वयम्) 2 x 1 = 2

(i) 'भजन्ते ' इत्यस्य क्रियापदस्य कर्तृपदं किं प्रयुक्तम् ?

(ii) 'स बाल्यात् एव वृद्धोपसेवी, विनयशीलः ... आसीत्। अत्र 'शैशवात्' इत्यस्मिन् अर्थे किं पदं प्रयुक्तम्?

(iii) 'वस्तूनि' इति पदस्य अनुच्छेदे किं विशेषणपदं प्रयुक्तम् ?

प्र.13. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।

पिता यच्छति पुत्राय बाल्ये विद्याधनं महत्।<br>
पिताऽस्य किं तपस्तेपे इयुक्तिस्तत्कृतज्ञता ॥

अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम् ) 2 x ½ = 1

(I) विद्याधनं कः यच्छति ?

(ii) पिता पुत्राय विद्याधनं कदा यच्छति?

(iii) कि धनं महत् अस्ति?

आ. पूर्णवाक्येन उत्तरत -(केवलं प्रश्नद्वयम् ) 2 x 1 = 2

(i) पिता कस्मै विद्याधनं यच्छति?

(ii) अत्र विद्याधनम् कीदृशं अमन्यत् ?

(iii) पुत्रः पितरं प्रति किम् अनुभवेत् ?

इ. निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत- (केवलं प्रश्नद्वयम् ) 2 x 1 = 2

(i) विद्याधनम्' श्लोके अस्य विशेषणपदं किम् ?

(ii) श्लोके "कृतघ्नता" पदस्य विलोमपदं किं प्रयुक्तम् ?

(iii) 'तेपे' इति क्रियायाः कर्तृपदं किम्?

प्र.14 अधोलिखित नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -

**बकः** - (प्रविश्य, स्वपक्षी अवधूय) कथं माम् अपि अधिक्षिपसि ? किं ते महत्त्वम् ? वर्षतौ तु मानसं पलायसे। अहम् एव अत्र वृष्टेः अभिनन्दनं करोमि । कीदृशी तव मैत्री? आपत्काले सरांसि त्यक्त्वा दूरे ब्रजसि। वस्तुतः अहमेव शीतले जले बहुकालपर्यन्तम् अविचलं ध्यानमग्नः 'स्थितप्रज्ञ' इव तिष्ठामि । दुग्धधवला मे पक्षाः | न जाने कथं माम् अपरिगणयन्तः जनाः चित्रवर्णम् अहिभुजं मयूरं 'राष्ट्र- पक्षी' इति मन्यन्ते। अहमेव योग्यः ।

**मयूरः** - (प्रविश्य साट्टहासम् ) सत्यं सत्यम्। अहमेव राष्ट्रपक्षी | को न जानाति तव ध्यानावस्थाम् ? मौन धृत्वा वराकान् मीनान् छलेन अधिगृह्य क्रूरतया भक्षयसि। धिक् त्वाम् । अवमानितं खलु सर्वं पक्षिकुलं त्वया ।

**काकः** - रे सर्पभक्षक! नर्तनात् अन्यत् किम् अपरं जानासि ?

**मयूरः** - श्रूयतां श्रूयताम्। मम नृत्यं तु प्रकृतेः आराधना | पश्य ! चारुवर्तुलचन्द्रिकाशोभितानां मम पिच्छानाम् अपूर्व सौन्दर्यम् । मम केकारवं श्रुत्वा कोकिलः अपि लज्जते मम शिरसि राजमुकुटमिव शिखां स्थापयता विधात्रा एव अहं पक्षिराजः कृतः ।

**अ**. एकपदेन उत्तरत (केवलं प्रश्नद्वयम् ) 2 x ½ = 1

(i) कः स्वपक्षौ अवधूय प्रविशति ?

(ii) कः वृष्टेः अभिनन्दनं करोति ?

(iii) केन मयूरः पक्षिराजः कृतः ?

आ. पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम् ) 2 x 1 = 2

(i) जनाः कं "राष्ट्र-पक्षी "इति मन्यन्ते ?

(ii) स्व पिच्छानां विषये मयूरः किं कथयति ?

(iii) बकः शीतले जले कीदृश: इव तिष्ठति ?

इ. यथानिर्देशं उचितं उत्तरं लिखत = (केवलं प्रश्नद्वयम्) 2 x 1 = 2

(i) अहम् एव अत्र वृष्टेः अभिनन्दनं करोमि - अस्मिन् वाक्ये क्रियापदं किम् ?

(ii) "परित्यज्य" इत्यस्य अर्थे किं पदम् अनुच्छेदे प्रयुक्तम् ?

(iii) 'जले' इत्यस्य पदस्य किं विशेषणपदं अनुच्छेदे प्रयुक्तम् ?

प्र.15. रेखाङ्कित - पदानि आधृत्य प्रश्ननिर्माणं कुरुत (केवलं पञ्चप्रश्नाः ) 5 x 1 = 5

(i) मनुष्यः आत्मनः **श्रेयः** इच्छति |

(ii) धैर्यं **आपदां** तरणिः |

(iii) विद्वांसः एव **चक्षुष्मन्तः** प्रकीर्तिताः |

(iv) **मनसः** निग्रहं अतीव कठिनं अस्ति |

(v) मम नृत्यं तु **प्रकृतेः** आराधना |

(vi) संसारे विद्वान्सः **ज्ञानचक्षुभिः** नेत्रवन्तः कथ्यन्ते |

प्र.16.अ.मञ्जूषातः समुचितपदानि चित्वा अधोनिखित-श्लोकस्य अन्वयं पूरयित्वा पुनः निखत- 4x½=2

त्यक्त्वा धर्मप्रदां वाचं परुषां योऽभ्युदीरयेत्।

परित्यज्य फलं पक्वं भुङ्क्तेऽपक्वं विमूढधीः ॥

अन्वयः - यः (i) ----- वाचम् त्यक्त्वा (ii)------- (वाचम्) अभ्युदीरयेत्। (सः)

(iii)----------- पक्वम् फलम् परित्यज्य (iv)--------(फलम्) भुङ्क्ते ।

मञ्जूषा

| | | | |
|---|---|---|---|
| धर्मप्रदाम्, | विमूढधीः, | अपक्वम्, | परुषाम् |

**अथवा**

आ . मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत

असंशयं महाबाहो ! मनो दुर्निग्रहं चलम् ।

अभ्यासेन तु कौन्तेय! वैराग्येण च गृह्यते ॥

भावार्थः- हे महाबाहो ! अत्र संशयः नास्ति यत् एतत् (i)------ अतीव चञ्चलम् अस्ति | इदं ii) ----- नियन्त्रितं भवति परन्तु यदि वयं पुनः पुनः (iii) ------ कुर्मः, विरक्ताः च भवामः तदा निश्चयेन एतत् वशीकर्तुं (iv) ------------ |

मञ्जूषा -

| | | | |
|---|---|---|---|
| बहुकष्टेन, | अभ्यासम्, | शक्नुमः, | मनः |

प्र.17. अधोलिखितबाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत 4 x 1 = 4

(i) राज्ञः नेत्रदान-निश्चयं ज्ञात्वा अमात्याः **<u>विषण्णाः</u>** अभवन् ।

(क) खिन्नाः (ख) विमुखाः (ग) चिन्तिताः (घ) प्रसन्नाः

(ii) अन्यस्मिन् **<u>अहनि</u>** महानसं प्रविष्टः मेषः सूप्रकारेण ताडितः।

(क) रात्रौ (ख) मार्गे (ग) दिवसे (घ) अवसरे

(iii) **<u>सपदि</u>** उपायः क्रियताम्

(क) एकपदेन (ख) पदेन सह (ग) झटिति (घ) विलंबेन

(iv) स विवेक इति **<u>ईरितः</u>** ।

(क) दृष्टः (ख) कथितः (ग) श्रुतः (घ) ईप्सितः

प्र.18. मञ्जूषापदत्तपदानां सहायतया रिक्तस्थानानि पूरयित्वा अधोलिखित-कथाम् उत्तरपुस्तिकायां लिखत - 8 x 1/2 = 4

चन्द्रनामकस्य राजपुत्राः राजगृहे वानरान् पालयन्ति स्म। तस्मिन् राजगृहे (i) --------आसीत्। तेषु एकः उद्दण्डः मेषः अहर्निशं (ii) -------- प्रविश्य यत् पश्यति स्म तत् खादति स्म। अतः तेन सह सूपकाराणां कलहः भवति स्म। मेषस्य सूपकाराणां च कलहं दृष्ट्वा वानराणां बुद्धिमान् यूथपतिः तान् अवदत् एतेषां कलहो वानराणां विनाशकारण भविष्यति अतः (iii) ------- राजभवनं त्यक्त्वा वनं गच्छामः। किन्तु (iv) ------- वानराः तस्य वचनम् अश्रद्धेय मत्वा वन न अगच्छन्। एकदा सः उद्दण्डः (v) -------- सूपकारैः ज्वलितकाष्ठेन ताडितः । ऊर्णाप्रचुरः मेषः जाज्वल्यमानशरीरः निकटस्थाम् अश्वशालां प्राविशत् । तेन अश्वशालायाम् अपि अग्निज्वालाः समुत्थिताः। अतः केचित् अधाः दग्धाः केचित् च (vi) ------- राजवैद्यः नृपम् अवदत् यत् अश्वानां वह्निदाहसमुद्भवः दोषः (vii) ------मेदसा नाशमध्येति । राजा आदिशत्- यथोचितं क्रियताम्। राजादेशं श्रुत्वा भयत्रस्ताः (viii) -----अचिन्तयन् - अवधीरिताः अस्माभिः गुरुजनोपदेशाः।

मञ्जूषा

| |
|---|
| मृताः, मेषः, वानराः, बालवाहनयोग्यम्, मदोद्धताः, वयम्, वानराणाम्, महानसम् |

o------------------------------------------------------x------------------------------------------------------o